दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् अधिकज्येष्ठकृष्णपञ्चमी
ज्येष्ठ 22 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-223 | 1 | जून 05, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 अग्रिमनिर्देशान् यावत् अधिकारिणां कर्मचारिणां च स्थानान्तरणेषु प्रतिबन्धः, सर्वकारेण स्वीकृतः निर्णयः

3 हिमाचले आकारं गृह्णाति नवीना श्वेतक्रान्तिः; ढगवार-संयन्त्रे प्रतिदिनं २४,००० सेटकमितं प्राप्तं दुग्धसङ्ग्रहणम्

5 विश्वपर्यावरणदिवसः (World Environment Day) प्रतिवर्षम् जून-मासस्य पञ्चमे दिनाङ्के (५ जून) समग्रविश्वात् महता उत्साहेन आचर्यते

## प्रधानमन्त्री नरेन्द्रमोदी नवदिल्ली-नगरे वेनेजुएलादेशस्य कार्यवाहक-राष्ट्रपतिना डेल्सी रोड्रिग्ज-महाभागया सह द्विपक्षीयवार्ता कृतवान्



**हिमसंस्कृतवार्ता नवदेहली ।** प्रधानमन्त्री नरेन्द्रमोदी गतदिने नवदिल्ली-नगरे वेनेजुएलादेशस्य कार्यवाहकराष्ट्रपतिना डेल्सी रोड्रिग्ज-महाभागया सह द्विपक्षीयवार्ता कृतवान्। उभाभ्यां नेतृभ्यां भारत-वेनेजुएला-सम्बन्धानां विविधपक्षाः समीक्षिताः। ऊर्जा-सुरक्षा, व्यापार-निवेशः, औषधिनिर्माणम्, स्वास्थ्यसेवा, परिवहनम् तथा नवीकरणीय ऊर्जाक्षेत्रेषु सहयोगविस्तारस्य उपायाश्च चर्चिताः। वार्ताहरान् संबोधयन् रुदेन्द्रटण्डनः प्रोक्तवान् यत् द्विपक्षीयवार्ताः उभयोः देशयोः संबंधम् सुदृढीकरोति । डेल्सी रोड्रिग्ज-महाभागा पञ्चदिवसीय-भारतयात्रायै परह्यः नवदिल्लीम् आगता। तया सह विदेशमन्त्रालयस्य, अर्थव्यवस्था-वित्तमन्त्रालयस्य, विज्ञान-प्रौद्योगिकीमन्त्रालयस्य तथा परिवहन-मन्त्रालयस्य मन्त्रिणः समाविश्यमानानाम् उच्चस्तरीयं प्रतिनिधिमण्डलमपि आगतम्। अस्याः यात्रायाः माध्यमेन उभयोः देशयोः आर्थिक ऊर्जा क्षेत्रयोः सहयोगः अधिकः सुदृढः भविष्यतीति अपेक्ष्यते।

### विदेशमन्त्रिणा एस्. जयशङ्करेण
#### द्विपक्षीयसहयोगस्य सुदृढीकरणे प्रदत्तम् बलम्

नवदिल्ल्यां विदेशमन्त्री एस्. जयशङ्करः गतदिने प्रातःकाले वेनेजुएलादेशस्य कार्यवाहकराष्ट्रपतिना डेल्सी रोड्रिग्ज् महोदयया सह सममिलत्। अस्मिन् अवसरे उभयोः देशयोः सम्बन्धानां सुदृढीकरणं विविधक्षेत्रेषु सहकारविस्तारश्च चर्चितः। सामाजिकान्तर्जाले प्रकाशिते संदेशे डॉ. जयशङ्करेण उक्तं यत् भारतं भारत-वेनेजुएला-सम्बन्धान् प्रति डेल्सी रोड्रिग्ज् महोदयायाः दीर्घकालिकप्रतिबद्धतायाः सम्मानं करोति। तेनोक्तं यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना सह तस्याः मेलनेन उभयोः देशयोः संबन्धः अधिकं सुदृढः भविष्यति। विदेशमन्त्रिणा आशा प्रकटिता यत् ऊर्जा-वाणिज्यादिक्षेत्रेषु भारत-वेनेजुएलादेशयोः सहभागित्वम् आगामिषु कालेषु अधिकं विस्तरिष्यते ।

## वयोवृद्धः चलचित्रनिर्माता तथा केन्द्रीयचलचित्रप्रमाणनमण्डलस्य पूर्वाध्यक्षः पहलाज निहलानी गतदिने मुम्बईनगरे दिवंगतः

वयोवृद्धः चलचित्रनिर्माता तथा केन्द्रीयचलचित्रप्रमाणनमण्डलस्य पूर्वाध्यक्षः पहलाज निहलानी गतदिने मुम्बईनगरे दिवंगतः। सः षट्सप्तति-वर्षीयः आसीत्। चलचित्रनिर्मातृत्वेन असौ 'हाथकड़ी' इति चलचित्रेण स्वकार्यजीवनस्य आरम्भम् कृतवान् । 'इल्ज़ाम' इति चलचित्रेण अभिनेत्रे गोविन्दाय प्रमुखावसरप्रदानस्य श्रेयः अपि तस्मै वर्तते। पंचदशोत्तरद्विसहस्र तमे वर्षे सः केन्द्रीयचलच्चित्रप्रमाणनमण्डलस्य अध्यक्षः नियुक्तः ।

## केरलराज्ये वायव्य -वर्षर्तोः आगमनम्

भारतीय-ऋतु-विभागेन गतदिने केरलराज्ये दक्षिण-पश्चिम-प्रावृडः आगमनस्य पुष्टिः कृता। अस्मिन् वर्षे वर्षर्तोः वृष्टिः सामान्यकालात् त्रिदिवस-विलम्बेन आगता। विभागेन नवम जून-दिनाङ्कपर्यन्तं केरलराज्ये माहे-क्षेत्रे च कतिपयेषु स्थानेषु अतिवृष्टेः सम्भावना प्रकटिता।

## भारतस्य लाओ-जनवादी-लोकतान्त्रिक-गणराज्यस्य च मध्ये बौद्धधर्मस्य रामायणस्य च विषयाधारिताः घनिष्ठाः सांस्कृतिक-सभ्यतागत-सम्बन्धाः सन्ति-राष्ट्रपतिः



भारत-लाओस-सम्बन्धविषये राष्ट्रपतिना द्वयोर्देशयोः सहयोगविस्तारस्य सम्भावनाः प्रतिपादिताः। राष्ट्रपतिः द्रौपदी मुर्मुः उक्तवती यत् भारतस्य लाओ-जनवादी-लोकतान्त्रिक-गणराज्यस्य च मध्ये बौद्धधर्मस्य रामायणस्य च विषयाधारिताः घनिष्ठाः सांस्कृतिक-सभ्यतागत-सम्बन्धाः सन्ति। राष्ट्रपतिभवने लाओस्देशस्य उपप्रधानमन्त्रिणं विदेशमन्त्रिणं च थोंगसावन फोमविहाने इत्यमूं स्वागतं कुर्वन्ती सा अवदत् यत् उभौ देशौ अस्मिन् वर्षे राजनयिक-सम्बन्धानां स्थापनायाः सप्ततितमवर्षम् समाचरतः। सा उक्तवती यत् व्यापार-निवेशयोः क्षेत्रे सहयोगविस्तारस्य पर्याप्ताः अवसराः सन्ति। सूचना प्रौद्योगिकी, स्वास्थ्यं, कृषिः, सिञ्चनम्, विनिर्माणम्, नवीकरणीय ऊर्जा तथा विद्युत्-क्षेत्रेषु सहयोगवर्धनाय भारतं सज्जम् अस्ति। पूर्वं विदेशमन्त्री एस् जयशंकरः अपि लाओसदेशस्य उपप्रधानमन्त्रिणा सह अमिलत्।

## मेरा-युवाभारतम् अधिकारिकरूपेण गीनिस विश्वकीर्तिमानेन सम्मानितः



मेरा-युवाभारतम् इतीदं आधिकारिकरूपेण गीनिस वर्ल्ड रिकार्ड्स इत्यनेन मान्यता प्राप्ता, यतोहि एकसप्ताहे आंतर्जाल प्रश्न इत्यस्य कृते सर्वाधिकानां उपयोक्तृणां उपाधिं प्राप्तवत्, यत्र प्रश्नानां अभासीय रूपेण उत्तरं प्रयच्छन्तः त्रिलक्षनवतिसहस्राात् अधिकाः प्रतिभागिनः आसन्। केन्द्रीय-युव-कार्य-क्रीडामन्त्री डा. मनसुख माण्डवीयः गतदिने नवदेहली-नगरे आयोजिते समारोहे सम्मानपत्रम् अवाप्नोत्। गतवर्षे अक्टूबर-मासस्य पञ्चविंशति दिनाङ्कात् एकत्रिंशत दिनाङ्कपर्यन्तं विकसित-भारत-यंग-लीडर्स-डयलाग षड्विंशत्युत्तर-द्विसहस्त्रम् प्रश्न इत्यस्य माध्यमेन अभिलेखः प्राप्तः।

## सुभाषितम्

**तृणानि भूमिरुदकं, वाक् चतुर्थी च सूनृता।**
**एतान्यपि सतां गेहे, नोच्छिद्यन्ते कदाचन॥**

भावार्थः- आसन, बैठने की भूमि, जल, चतुर्थ सत्य और मधुर वाणी इनका सज्जनों के घर में कभी अभाव नहीं होता है।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला ज़िला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## अमरीकादेशस्य प्रतिनिधिसभा राष्ट्रपतिः डॉनल्ड ट्रम्पम् ईरानदेशम् विरुध्य अग्रिमसैन्यकार्याचरणात् निरोद्धुं प्रस्तावं स्यकरोत्



अमरीकादेशस्य प्रतिनिधिसभा राष्ट्रपतिः डॉनल्ड ट्रम्पम् ईरानदेशम् विरुध्य अग्रिमसैन्यकार्याचरणात् निरोद्धुं प्रस्तावं स्यकरोत् । एषः चतुर्थः अवसरः अस्ति यदा प्रतिनिधिसभा ताभिः युद्धसम्बद्धाभिः शक्तिभिः सीमिता भवेत् इत्यर्थं प्रयासं करोति। आलोचकानाम् अनुसारेण ईरानविरोधे सैन्यकार्याय संसदः अनुमोदनम् आवश्यकम् अस्ति।

# अग्रिमनिर्देशान् यावत् अधिकारिणां कर्मचारिणां च स्थानान्तरणेषु

## प्रतिबन्धः, सर्वकारेण स्वीकृतः निर्णयः

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशे शासकीय-अधिकारिणां कर्मचारिणां च स्थानान्तरणेषु अग्रिमनिर्देशान् यावत् प्रतिबन्धः यथावत् स्थास्यति। अस्मिन् विषये कार्मिकविभागेन सर्वे प्रशासनिकसचिवाः, विभागाध्यक्षाः, सर्वे मण्डलायुक्ताः, उपायुक्ताः, बोर्ड-निगमानां प्रबन्धनिदेशकाः, विश्वविद्यालयाः, स्वायत्तशासी-निकायाश्च निर्दिष्टाः सन्ति। निर्देशेषु कथितं यत् अस्य विभागस्य ६ अप्रैल दिनाङ्के प्रसारितेन पत्रेण सर्वेषां राज्यशासकीय- अधिकारिणां कर्मचारिणां च स्थानान्तरणे अग्रिमादेशं यावत् पूर्णप्रतिबन्धः आरोपितः आसीत्। अस्मिन् प्रसङ्गे एतत् पुनः आवर्त्यते यत् उपर्युक्तः प्रतिबन्धः यथावत् स्थास्यति।

### सक्षमप्राधिकारिणः पूर्वविशिष्टस्वीकृतिं विना स्थानान्तरणस्यादेशः न भविष्यति-

यावत् सर्वकारस्य पक्षतः अस्मिन् विषये अग्रिमाः निर्देशाः न प्रसार्यन्ते, तावत् कस्यापि राज्य- शासकीय- अधिकारिणः कर्मचारिणः वा स्थानान्तरणस्य आदेशः न प्रदास्यते। एतेन सहैव कस्यापि अधिकारिणः कर्मचारिणः वा स्थानान्तरणस्य आदेशः सक्षमप्राधिकारिणः पूर्वविशिष्टस्वीकृतिं प्राप्तं विना न दास्यते। एतत् कार्यं 'व्यापक- मार्गदर्शक- सिद्धान्तः २०१३' इत्यस्य 'पैरा ८' मध्ये अन्तर्निहितप्रावधानानाम् अनुरूपम् एव भवितव्यम्। एतेषु समये समये संशोधनानि अपि कृतानि सन्ति।

### निर्देशानाम् उल्लङ्घनं गम्भीरतया नेष्यते- सर्वकारः

कार्मिकविभागेन सर्वैः सम्बद्धैः अनुरोधः कृतः यत् ते एतेषां निर्देशानाम् अक्षरशः पूर्णभावेन च दृढतया अनुपालनं सुनिश्चितं कुर्युः। एते निर्देशाः तत्कालं सर्वान् अधीनस्थकार्यालयान् प्रति प्रेषणीयाः, तेषां प्रशासनिकनियन्त्रणान्तर्गते आगच्छतां सर्वेषाम् अधिकारिणां कर्मचारिणां च ज्ञाने आनेयाः। एतेषां निर्देशानां केनापि प्रकारेण कृतम् उल्लङ्घनं गम्भीरतया नेष्यते।

### पूर्वं ३१ मार्च पर्यन्तम् कार्यान्वितः आसीत् प्रतिबन्धः

विशेषरूपेण उल्लेखनीयं वर्तते यत् सर्वकारेण १३ जनवरी २०२६ दिनाङ्के 'क्लास सी' तथा 'डी' इत्यस्य श्रेणीनां कर्मचारिणां (शिक्षा-तान्त्रिकशिक्षा- विभागयोः शिक्षणसंवर्गं विहाय) स्थानान्तरणेषु आरोपितः प्रतिबन्धः ३१ मार्च २०२६ पर्यन्तं कार्यान्वितः आसीत्। अतः परं ६ अप्रैल दिनाङ्कात् स्थानान्तरणे पुनः प्रतिबन्धः आयोजितः। अधुना नगरीयनिकाय- पञ्चायतनिर्वाचनानां समाप्तौ सत्यामपि स्थानान्तरणे प्रतिबन्धः यथावत् स्थापितः अस्ति। विशेषेषु अपरिहार्येषु च परिस्थितिषु केषुचित् प्रकरणेषु स्थानान्तरणस्य अनुमतिः प्रदातुं शक्यते।

# गुजरात-आरक्षि-विभागेन राज्ये अवैधरूपेण निवसतः बाङ्ग्लादेशीय-नागरिकान् विरुध्य 'ऑपरेशन डेल्टा हण्ट' नाम्ना विशेष अभियानम् प्रारब्धम्



गुजरात-आरक्षि-विभागेन राज्ये अवैधरूपेण निवसतः बाङ्ग्लादेशीय-नागरिकान् विरुध्य 'ऑपरेशन डेल्टा हण्ट' नाम्ना विशेष अभियानम् प्रारब्धम्। अस्य अभियानस्य अन्तर्गतं गत-चतुर्विंशति होरासु चतुर्विंशतधिकः चतुष्शतं बाङ्ग्लादेशीयाः गृहीताः, तथा च द्विअशीतिअधिकः सप्तशतं अधिक सन्दिग्ध-जनानां विषये अन्वेषणं प्रचलति। उपमुख्यमन्त्री गृहमन्त्री च हर्ष संघवी उक्तवान् यत् राज्यस्य सुरक्षायै संकटकारिणः सर्वान् अनधिकृतोपवेशिनः चिन्हीकृत्य तेषां विरोधे वैधानिकम् क्रियान्वयनं विधास्यते, तान् स्वदेशं प्रेषयिष्यन्ति च। अवैधप्रवासिभ्यः आश्रयं साहाय्यं वा प्रदातृभ्यः अपि कठोरक्रियान्वयनं प्रदास्यते।

# दिल्लीमुख्यमन्त्री मालवीयनगर-अग्निकाण्डेन आहतान् द्रष्टुं साकेतस्थम् निजीचिकित्सालयं गतवती



दिल्लीमुख्यमन्त्री रेखा गुप्ता गतदिने मालवीयनगर-अग्निकाण्डेन आहतान् द्रष्टुं साकेतस्थम् निजीचिकित्सालयं गतवती । सा पीडितैः तथा तेषां परिवारजनैश्च सह संवादम् कृतवती । प्रत्येकम् मृतकस्य परिवाराय दश-लक्ष-रूप्यकाणां, गम्भीररूपेण आहतेभ्यः पञ्च-लक्ष-रूप्यकाणां च अनुग्रहधनस्य घोषणा कृता। ज्ञातव्यं यत्, मालवीयनगरस्थिते वसतिगृहे अग्निकाण्डे एकविंशतिः जनाः मृताः।

# अहमदाबाद-नगरे विश्व-योगासन-क्रीडा स्पर्धाश्रृंखला इत्यस्य उद्घाटनम्



गुजरातस्य अहमदाबाद-नगरे विश्व-योगासन-क्रीडा स्पर्धाश्रृंखला इत्यस्य उद्घाटन-संस्करणस्य आरम्भः अभवत्। इदम् वैश्विक-क्रीडा-मार्गसूच्यां ऐतिहासिकं सोपानं निर्दिशति। प्रधानमन्त्री नरेन्द्रमोदी सायङ्काले अन्तर्जाल-माध्यमेन अस्मिन् महा-कार्यक्रमे भागम् गृहीतवान्। स्वस्य शुभाशयाः निवेदयति, यतः जगतः योगानुरागिणः क्रीडकाः च प्रतियोगितायाः कृते समागच्छन्ति। "इति।

# शासनव्यवस्थां भद्रतरं कर्तुं कल्याणकारिणीनां योजनानां प्रभाविनं क्रियान्वयनं सुनिश्चयं कर्तुं प्रविधिना महत्वपूर्णा भूमिका निर्वहिता-अल्पसंख्यककार्यमन्त्री



अल्पसंख्यक कार्य मन्त्री किरेन रिजिजू गतदिने न्यगादीत् यत् शासनव्यवस्थां भद्रतरं कर्तुं कल्याणकारिणीनां योजनानां प्रभाविनं क्रियान्वयनं सुनिश्चयं कर्तुं प्रविधिना महत्वपूर्णा भूमिका निर्वहिता। असौ अल्पसंख्यक-कार्यमन्त्रालय द्वारा गतदिने नवदिल्ल्यां आयोजितानां परिष्काराणां द्वादशवर्षप्रपूर्त्यवसरस्य उपलक्ष्ये मन्यमानं परिष्कारोत्सवं सम्बोधयन्नुक्तवान्।

# बिहारराज्यस्य मुजफ्फरपुरनगरे एकस्मिन् निजीचिकित्सालये भीषणाग्निकाण्डे त्रयः जनाः मृताः



बिहारराज्यस्य मुजफ्फरपुरनगरे एकस्मिन् निजीचिकित्सालये भीषणाग्निकाण्डे त्रयः जनाः मृताः, अनेके च आहताः। एषा घटना गत-रात्रौ ब्रह्मपुरा-क्षेत्रे अभवत्। गम्भीररोगिणः उपचारार्थं अन्येषु चिकित्सालयेषु प्रविष्टाः। प्रशासनम् घटनायाः अन्वेषणं करोति ।

# मन्त्रिमण्डलेन अधुना यावत् ११६० निर्णयाः स्वीकृताः; उपसमित्या कथितम्- ९९ प्रतिशत् निर्णयानां संजातम् अनुपालनम्

हिमसंस्कृतवार्ताः- शिमला। राजस्व- बागवानीमन्त्रिणः जगतसिंहनेगीवर्यस्य अध्यक्षतायां गुरुवासरे अत्र मन्त्रिमण्डलीय-उपसमित्याः उपवेशनम् आयोजितम्। उपवेशने आवास- तान्त्रिकशिक्षा- व्यावसायिक- औद्योगिकप्रशिक्षण-नगरनियोजनमन्त्री राजेश धर्माणी अपि उपस्थितः आसीत्। अस्मिन् अन्तराले मन्त्रिमण्डलस्य उपवेशनेषु गृहीतानां निर्णयानां कार्यान्वयनस्य समीक्षा विहिता। उपवेशने विज्ञापितं यत् १३ जनवरी २०२३तः ३० जून २०२५ पर्यन्तं मन्त्रिमण्डलस्य उपवेशनेषु ११६० निर्णयाः स्वीकृताः आसन्, येषु ९९ प्रतिशत् निर्णयाः पूर्णरूपेण कार्यान्विताः संजाताः। अवशिष्टाः १ प्रतिशत् निर्णयाः अधिकृत्य अपि विमर्शाः कृताः, येषु वित्त- स्वास्थ्य- उद्योग- जलशक्ति- बहुउद्देशीय-परियोजना- ऊर्जासम्बद्धाः निर्णयाः सम्मिलिताः सन्ति। जगतसिंहनेगिना अधिकारिणां भृशं प्रशंसा कृता, अवशिष्टान् निर्णयान् च समयबद्धरूपेण कार्यान्वितुं निर्देशाः दत्ताः। अस्मिन् उपवेशने मुख्यसचिवः कमलेशकुमारपन्तः, प्रधानसचिवः देवेशकुमारः, मुख्यमन्त्रिणः सचिवः राकेशकंवरः, स्वास्थ्यसचिवः एम. सुधादेवी, सहकारितासचिवः अमरजीतसिंहः, अङ्कीयप्रौद्योगिकी- सुशासनसचिवः (डिजिटल टेक्नोलॉजी एंड गवर्नेंस) आशीषसिंहमारः, सदस्यसचिवः हरबंससिंहब्रास्कॉनः, नगरीयविकासनिदेशकः नीरजकुमारः, कोष- लेखा- क्रीडा- निदेशकः (ट्रेजरी अकाउंट्स) विजयवर्धनः अन्ये च अधिकारिणः उपस्थिताः आसन्।

# हिमाचले आकारं गृह्णाति नवीना श्वेतक्रान्तिः; ढगवार-संयन्त्रे प्रतिदिनं २४,००० सेटकमितं प्राप्तं दुग्धसङ्ग्रहणम्




हिमसंस्कृतवार्ताः- धर्मशाला। सुखविन्दरसिंहसुक्खु-सर्वकारस्य दूरदर्शिनीनां नीतीनां प्रभावः अधुना धरातले संदृश्यते। ग्रामीण- अर्थव्यवस्थां सुदृढां कर्तुं सर्वकारस्य सङ्कल्पात् काङ्गड़ाजनपदस्य कृषकाणां पशुपालकानां च वदनेषु प्रसन्नतायाः हासः प्रकटितः अस्ति। प्रदेशसर्वकारेण दुग्धक्रयमूल्ये कृतायाः वृद्धेः साक्षात् लाभः ग्रामीण-अर्थव्यवस्थायां स्पष्टं दृश्यते। अधुना कृषकाः अनुद्योगिनश्च दुग्धोत्पादनं प्रति स्वजीविकां प्रति च पादौ वर्धितवन्तः सन्ति। पशुपालनं यत् पूर्वं केवलं जीविकायाः साधनं मन्यते स्म, तत् अधुना कृषकाणां कृते सुदृढः व्यवसायः जायमानः अस्ति। सुक्खूसर्वकारस्य प्रयासैः हिमाचलप्रदेशे नवीना श्वेतक्रान्तिः आकारं ग्रहीतुम् आरब्धवती।

### दुग्धक्रयमूल्यस्य वर्धनेन प्रतिदिनं ६२०० सेटकतः २४ सहस्रसेटकपर्यन्तं क्षमतायां संजाता वृद्धिः

वर्षत्रये सर्वकारेण दुग्धस्य क्रयमूल्ये प्रतिकिलोग्रामं २१ रूप्यकाणां वृद्धिः विहिता। अस्य निर्णयस्य परं कृषकेषु नूतनः उत्साहः दृष्टः, दुग्धशालाक्षेत्रं (डेयरी क्षेत्र) प्रति च जनानां रुचिः निरन्तरं वर्धमाना अस्ति। अस्यैव परिणामः वर्तते यत् दिसम्बर २०२३ तमे वर्षे यत्र केवलं ४४ दुग्धसहकारिसमितिभ्यः प्रायः ६२०० सेटकमितं दुग्धं सङ्गृह्यते स्म, तत्रैव अद्य तत् वर्धित्वा प्रतिदिनं २४००० सेटकमितं संजातम्। एतेन सहैव काङ्गड़ा- क्लस्टर मध्ये ३५२ दुग्धसहकारिसमितीनां गठनमपि विहितम्।

### डगवार-क्षेत्रे २२५ कोटिरूप्यकाणां व्ययेन निर्मीयते स्वचालितं दुग्धप्रसंस्करणसंयन्त्रम्

दुग्धक्षेत्रं च अधिकं सशक्तं कर्तुं काङ्गड़ा-जनपदस्य डगवार-क्षेत्रे प्रायः २२५ कोटिरूप्यकाणां (२२५ करोड़) व्ययेन एकम् अत्याधुनिकं पूर्णतः स्वचालितं दुग्धप्रसंस्करणसंयन्त्रं (ऑटोमैटिक मिल्क प्रोसेसिंग प्लांट) संस्थाप्यमानं वर्तते, यस्य सितम्बरमासपर्यन्तं सज्जतायाः सम्भावना अस्ति। एतदतिरिच्य, काङ्गड़ा-दुग्धसङ्घस्य अन्तर्गतं २० सहस्रकिलोलीटर-क्षमतायुक्तौ द्वे नूतने शीतनकेन्द्रे (चिलिंग सेंटर) अपि संस्थाप्येते। अस्मिन् नूतने संयन्त्रे दुग्धेन सहैव 'फ्लेवर्ड मिल्क' (सुरभित- दुग्धम्), दधि, तक्रम् (लस्सी), मोजरेला-चीज, पनीरम्, योगर्ट, खोया इत्यादीनां मूल्यवर्धित- उत्पादानां (वैल्यू एडेड प्रोडक्ट्स) निर्माणं करिष्यते। अनेन न केवलं कृषकाः उत्तमम् आपणं प्राप्स्यन्ति, अपि तु प्रदेशस्य युवभ्यः जीविकायाः नवीनाः अवसराः अपि सृष्टाः भविष्यन्ति। हिमाचलप्रदेश-सर्वकारस्य एते प्रयासाः दुग्धोत्पादनं वर्धयितुं, कृषकाणाम् आयं वर्धयितुं ग्रामीण- अर्थव्यवस्थां च सुदृढां कर्तुं प्रमुखाणि पदानि सन्ति। सहकारिदुग्धसमितिषु गोदुग्धं प्रायः ५१ रूप्यकाणि प्रति-किलोग्रामं यावत् क्रीयते। उत्तममूल्यप्राप्त्या कृषकाणां प्रवृत्तिः पशुपालनं प्रति वर्धिता।

### सक्रियाः अभवन् पशुपालकाः-

उत्तम-आयस्य आशया न केवलं पुरातनाः पशुपालकाः सक्रियाः अभवन्, अपितु महत्यां सङ्ख्यायां युनः अपि एतत् स्वरोजगाररूपेण स्वीकर्तुम् आरब्धवन्तः। दुग्धस्य क्रयमूल्ये वृद्धेः प्रभावः उत्पादने अपि स्पष्टं दृश्यते। एकवर्षस्य अन्तराले प्रदेशे दुग्धोत्पादनं प्रायः द्विगुणीकृतं संजातम्।

### किं वदन्ति दुग्धोत्पादकाः?

दाड़ीक्षेत्रस्य पवनः कथयति यत् पूर्वं दुग्धस्य मूल्यं प्रायः ३० रूप्यकाणि प्रति-किलोग्रामं प्राप्यते स्म, किन्तु अधुना तत् वर्धित्वा ५१ रूप्यकाणि संजातम्। क्रयमूल्यस्य वर्धनेन दुग्धोत्पादकेभ्यः महती शान्तिः प्राप्ता, आये अपि परिष्कारः अभवत्। अहम् प्रतिदिनं प्रायः दशसेटकमितं दुग्धं सहकारिदुग्धसभायै ददामि। पशुपालनं मम आयस्य प्रमुखं साधनं संजातम्। दुग्धतः प्रतिमासं प्रायः १५ सहस्ररूप्यकाणाम् आयः भवति, येन परिवारस्य व्ययः सुगमतया प्रचलति, अग्रे च पशुपालनविस्तारस्य योजना अस्ति। समित्या सह सम्बद्धः तंगरोटी-क्षेत्रस्य विकाससरीनः वदति यत् सः सुदीर्घकालात् दुग्धोत्पादनेन सह सम्बद्धः अस्ति, किन्तु अधुना सर्वकारेण दुग्धमूल्ये वृद्धिः कृता यस्मात् परं जनाः दुग्धोत्पादनेन सह आत्मानं योजयितुम् आरब्धवन्तः। तंगरोटीक्षेत्रे एव दुग्धसहकारिसमितिम् गत्वा प्रायः प्रतिदिनं १२०० सेटकमितं दुग्धं डगवार-दुग्धसयन्त्राय प्रदीयते। ढगवार-मिल्क-प्रोसेसिंग-प्लांट इत्यस्य प्रबन्धकः अखिलेशपराशरः कथयति यत् मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खु महोदयस्य दूरदर्शिनीनां नीतीनां प्रभावः अधुना धरातले दृश्यते। दुग्धस्य क्रयमूल्ये वृद्ध्या उत्पादने द्विगुणीकृता वृद्धिः संजाता। सर्वकारः अधुना संयन्त्राणां (प्लांटों की) क्षमतां वर्धयितुं गच्छति, येन आगामिनि समये कृषकेभ्यः अधिकं दुग्धं क्रेतुं शक्ष्यते।

# HP Elections:

# जिलापरिषत्सु सत्तास्थापनार्थं भाजपा कटिबद्धा, विधायकेभ्यः पूर्वप्रत्याशिभ्यश्च उत्तरदायित्वम्



हिमसंस्कृतवार्ताः शिमला। भारतीयजनतापार्टी (भाजपा) इदानीं जिलापरिषत्सु सत्तायाः पूर्णनियन्त्रणं स्थापितुं रणनीत्याः तीव्रगत्या कार्यं करोति। दलस्य सम्पूर्णं ध्यानं जिलापरिषदः अध्यक्ष-उपाध्यक्षपदयोः विजयं सुनिश्चितं कर्तुं वर्तते। एतदर्थं सङ्घटनेन प्रदेशादारभ्य मतदानकेन्द्रस्तरपर्यन्तं स्वकीयतन्त्रं सक्रियं कृतम् अस्ति, राजनैतिकसमीकरणानां सन्तुलनप्रक्रिया च तीव्रीकृता। अष्टसु जनपदेषु बिलासपुर- मण्डी- कुल्लू- ऊना- सोलन- हमीरपुर- किन्नौर- सिरमौरक्षेत्रेषु दलसमर्थित- प्रत्याशिनः स्पष्टं बहुमतं प्राप्तवन्तः।

### विधायकेभ्यः पूर्वविधायकेभ्यश्च दायित्वसमर्पणम्-

शिमला-काङ्गड़ाजनपदयोः निर्दलीयप्रत्याशिनां भूमिका महत्त्वपूर्णा मन्यते। अत्र अध्यक्ष- उपाध्यक्षपदयोः प्राप्यमाणसंभावनानां विषये दले गभीरं मन्थनं चलति। एतयोः द्वयोः जनपदयोः दलीयनेतृत्वं निरन्तरं सम्पर्क-संवादरणनीत्या कार्यं करोति। जिलापरिषदः सदस्यान् एकत्रीकर्तुं राजनैतिकसमन्वयं च स्थापयितुम् उत्तरदायित्वं सम्बद्धक्षेत्राणां विधायकेभ्यः, पूर्वविधायकेभ्यः, विधानसभानिर्वाचने भागं गृहीतवद्भ्यः प्रत्याशिभ्यः, वरिष्ठनेतृभ्यश्च प्रदत्तम् अस्ति। दलेन सर्वेभ्यः जनपदप्रभारिभ्यः सह-प्रभारिभ्यश्च विशेषं दायित्वं सङ्क्रान्तम्। प्रभारिणः निरन्तरं जनपदानामटनं कृत्वा स्थानीयनेतृत्वेन, निर्वाचितसदस्यैः, वरिष्ठकार्यकर्तृभिश्च सह उपवेशनानि कुर्वन्ति।

### विवरणिकायाः आधारेण अन्तिमा सूची सज्जीभविष्यति-

एतेषु उपवेशनेषु संभावित- अध्यक्ष- उपाध्यक्षप्रत्याशिनां नाम्नां चर्चया सह आरक्षणपञ्जिकायाः आधारेण दावेदाराणां सूची सज्जीक्रियते। सम्बद्धजनपदेभ्यः प्राप्तायाः प्रतिक्रियायाः (फीडबैक), विधायकानां मतस्य, पूर्वप्रत्याशिनां परामर्शस्य, जनपदप्रभारिणां विवरणिकायाश्च आधारेण अन्तिमा सूची निर्माप्यते। एतस्याः सम्पूर्णप्रक्रियायाः निरीक्षणं प्रदेशनेतृत्वं स्वयं करोति। प्रदेशाध्यक्षः डॉ. राजीवबिन्दलः, विपक्षनेता जयरामठाकुरः, सङ्घटनमहामन्त्री सिद्धार्थश्च निरन्तरं जनपदेभ्यः विवरणं गृह्णन्ति। बुधवासरे आयोजितायां प्रदेशनेतृत्वस्य एकायां महत्त्वपूर्णायां आभासी-उपवेशने अपि विभिन्नानां जनपदानां राजनैतिकस्थितेः संभावित-मण्डल- गठनस्य च विस्तृता समीक्षा कृता।

## दलीयविचारधारया सम्बद्धैः २८ निर्दलीय- विजयिप्रत्याशिभिः सह सम्पर्कः

भाजपायाः रणनीतेः एकः महत्त्वपूर्णः भागः तान् २८ विद्रोहिणः (बागी) निर्दलीयान् च विजयिप्रत्याशिनः अपि स्वसहयोगिनः कर्तुं वर्तते, ये वैचारिकरूपेण दलस्य निकटवर्तिनः मन्यन्ते। दलीयनेतृत्वस्य विश्वासः अस्ति यत् यदि एतेषां प्रतिनिधीनां सङ्घटनेन सह समन्वयः स्थाप्यते, तर्हि जिलापरिषत्सु स्थिरं दृढं च मण्डलगठनं सुनिश्चितं भवितुं शक्नोति। दलीयनेतृणाम् अनुसारं जिलापरिषदः सदस्यानां शपथग्रहणप्रक्रियायाः समाप्त्यन्तरमेव अध्यक्ष-उपाध्यक्षपदयोः संभावितानां नाम्नां सूची सार्वजनिकी कर्तुं शक्यते। दलम् कस्यापि प्रकारस्य दलबन्द्याः अथवा अन्तिमसमयस्य राजनैतिकविप्लवाद् रक्षितुं पूर्वमेव सर्वान् विकल्पान् परिशीलयति।

# आवास-बोर्डस्य रिक्तभूमौ निर्मितानि भविष्यन्ति नवीनानि आवासानि, एनबीसीसी-संस्थया सह सञ्जाता महत्त्वपूर्णम् उपवेशनम्



**हिमसंस्कृतवार्ताः- डॉ. राघवनाथ झा, पाटलिपुत्रम्।** बिहारे आवासीयसौविध्यानां विस्ताराय नगरीयविकासस्य गत्युपबृंहणाय च राज्यशासनेन आवास- बोर्डस्य बहुवर्षेभ्यः रिक्तायाः भूमेः सदुपयोगाय प्रयासः तीव्रतरः कृतः। अस्मिन्नेव क्रमे नगरविकास एवम् आवासमन्त्री माननीयः नीतीशमिश्र महोदयः गुरुवासरे 'नेशनल बिल्डिंग्स कंस्ट्रक्शन कॉर्पोरेशन लिमिटेड' (एनबीसीसी) इत्यस्याः संस्थायाः अध्यक्षेण प्रबन्धनिक्षेपकेण च डॉ. के. पी. महादेवास्वामी महोदयेन सह एकं महत्त्वपूर्णं वैचारिक- उपवेशनं कृतवान्। अस्मिन् उपवेशने आवास-बोर्डस्य अवशिष्टायां भूमौ नवीनानाम् आवासीयपरिसराणां निर्माणाय योजनानां विस्तरेण विमर्शः सञ्जातः। प्रस्तावित-परियोजनानां मुख्यमुद्देश्यं विभिन्न-आयवर्गस्य नागरिकेभ्यः न्यूनमूल्यं गुणवत्तापूर्णं च आवासं उपलब्धं कारयितुम् अस्ति। अनेन सहैव आधुनिकसुविधाभिः युक्तानां आवासीयपरिसराणां विकासेन नगरीयक्षेत्रेषु आधारभूतसंरचना सुदृढ़ा विधास्यते।

मन्त्री नीतीशमिश्रमहोदयः अवदत् यत् राज्यसर्वकारः योजनाबद्ध- नगरीय- विकासाय नागरिकेभ्यः उत्तम-आवासीय-सौकर्य-प्रदानाय च निरन्तरं यतते। प्रवर्धमानं नगरीकरणं वीक्ष्य आवासस्य आधारभूतसंरचनायाः च विकासस्य आवश्यकता पूर्वस्मात् अपि अधिका जाता। ईदृशे समये अनुभवीसंस्थानां सहचर्येण परियोजनानां समयबद्धरूपेण समापनं सर्वकारस्य प्राथमिकी वर्तते। अस्यां मन्त्रणायां राज्ये सम्भाव्य- परियोजनानां क्रियान्वयन- प्राविधिकसहयोग- निवेशसम्बद्धानां विविधानां पक्षाणां गम्भीरतापूर्वकं मूल्याङ्कनं कृतम्। मन्त्रिणा दृढविश्वासः प्रकटितः यत् एतासां परियोजनानां सम्पूर्त्यनन्तरं जनेभ्यः उन्नतजीवनस्तरं प्राप्स्यते, नगरविकासश्च नवां दिशं अवाप्स्यति। अस्यां उच्चस्तरीयबैठकायां नगरविकास एवम् आवासविभागस्य प्रधानसचिवः विनय कुमार महोदयः, बिहारराज्य- आवास- बोर्डस्य प्रबन्धनिदेशकः निलेश देवरे महोदयः तथा च एनबीसीसी संस्थायाः कार्यपालकनिदेशकः प्रदीपशर्मा महोदयः अपि सोत्साहम् उपस्थिताः आसन्। उल्लेखनीयमस्ति यत् 'एनबीसीसी (इण्डिया) लिमिटेड' इति भारतसर्वकारस्य एका 'नवरत्न' इति उपाधिना विभूषिता सावयवा संस्था (सार्वजनिक उपक्रम) अस्ति, या सम्पूर्णदेशे निर्माण- परियोजना-प्रबन्धनयोः क्षेत्रे स्वकीयवैदुष्याय वैशिष्ट्याय च सुविख्याता वर्तते।

## लखनऊनगरे १४ दिवसीय- संस्कृत- प्रशिक्षणवर्गस्य आयोजनम्






**हिमसंस्कृतवार्ताः- आचार्यदीनदयालशुक्लः, लखनऊ।** संस्कृतभारती पूर्वोत्तरप्रदेशस्य, केन्द्रीय-संस्कृत- विश्वविद्यालयस्य लखनऊपरिसरस्य च संयुक्ताश्रयेण केन्द्रीयसंस्कृतविश्वविद्यालये लखनऊपरिसरस्थ- विशालखण्ड- ४,गोमतीनगरे, लखनऊनगरे १४ दिवसीय- संस्कृत- प्रशिक्षणवर्गस्य आयोजनं क्रियते। उद्घाटनम् अद्य ०३ जून् २०२६ तमे अभवत्। उद्घाटनकार्यक्रमे मुख्यातिथिः राष्ट्रीय-स्वयंसेवक- संघस्य (आरएसएस) अखिलभारतीय-प्रचारप्रमुखः स्वान्तरंजनवर्यः, डॉ. चंद्रभूषणत्रिपाठी, आईएएस, सरस्वतातिथित्वेन उपस्थितौ आस्ताम्। कार्यक्रमस्य अध्यक्षतां लखनऊ परिसरस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य निदेशकः प्राध्यापकः सर्वनारायण झा अकरोत्। कक्षायाः संचालनं संस्कृतभारतीयाः क्षेत्रीयसङ्गठनमन्त्री प्रमोदपण्डितः, क्षेत्रीयमन्त्री डॉ. कन्हैयालालझाः च कृतवन्तः। संस्कृतभारती- काशीप्रान्तस्य सहमन्त्री डॉ. शालिग्राम त्रिपाठी अध्यापननेतृत्वेन कार्यं कृतवान्। संस्कृतभारत्याः अखिलभारतीय- प्रशिक्षणप्रमुखः श्रीरामजी स्वपरिचयसम्बोधने संस्कृतं सर्वेषां भवति, सर्वत्र भवितुमर्हति इति उक्तवान्, अत एव संस्कृतभारती ४५ वर्षाणि यावत् कार्यं कुर्वती अस्ति। राष्ट्रीय- स्वयंसेवक- संघस्य अखिलभारतीय-प्रचारकप्रमुखः, कार्यक्रमस्य मुख्यातिथिः स्वान्तरंजनवर्येण उक्तं यत् जगति यत्किमपि ज्ञानं वर्तते तत् संस्कृतसाहित्ये एव प्राप्यते। प्राचीनभारते गुरुकुलैः, विद्यालयैः च शिक्षा प्रदत्ता आसीत्। सारस्वतः अतिथिः डॉ. चन्द्रभूषण त्रिपाठी, आईएएस, संस्कृतं भारतस्य आत्मा इति उक्तवान्। आध्यक्षीयसम्बोधने प्रो. सर्वनारायण झाः उक्तवान् यत् प्राचीनभारते ग्रामाः आसन् येषु विद्यालयाः चालिताः आसन्, येषु समाजे प्रत्येकः व्यक्तिः शिक्षितः भवति स्म। धन्यवाद ज्ञापनं डॉ. कन्हैयालालझावर्येण कृतम्। कक्षायां शिक्षकाः देवेशः, विमलः, प्रज्ञा, दामिनी च आसन्, प्रबन्धकाश्च डॉ. अतुलः, डॉ. लक्ष्मणेन्द्रः, डॉ. राहुलः, विवेकः च आसन्। शान्तिमन्त्रेण कार्यक्रमस्य समापनम् अभवत्।

## वार्ता-संवादः





**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**नन्दिनी-** अद्य प्रथमा वार्ता कर्णाटकस्य राजधान्याः आगता। केनचित् कर्मकरेण कथितं यत् बेङ्गलूरुनगरे लक्ष-रूप्यकापेक्षया अधिकं धनं प्राप्य अपि स्वजन्मभूमौ अल्पधनेन एव अधिकं सुखम् अनुभूतम् इति।

**काव्या-** सत्यं कथितं तेन। नगरेषु जीवनव्ययः अधिकः वर्तते, अतः ग्रामेषु एव शान्तिः अनुभूयते। द्वितीया वार्ता तु एका अद्भुता कथा अस्ति। राजस्थानस्य पञ्चदशवर्षीयः एकः बालकः गर्वितः एकदिवसार्थं मण्डलाधिकारी जातः। तेन स्वस्य चिरवाञ्छितः स्वप्नः पूरितः।

**नन्दिनी-** अहो! तस्य बालकस्य उत्साहः मया श्लाघितः। तादृशः अवसरः केनचित् एव प्राप्यते। तृतीया वार्ता भ्रातृस्नेहस्य अस्ति। येन छात्रेण परीक्षायां द्वात्रिंशत्तमं स्थानं प्राप्तम्, तेन मुम्बईनगरे लब्धः उत्तमः प्रवेशः त्यक्तः, यतः सः चेन्नईनगरे स्वस्य यमज-भ्रात्रा सह अध्येतुम् इच्छति स्म।

**काव्या-** अहो अद्भुतं प्रेम! तादृशः त्यागः केवलं स्नेहेन एव कर्तुं शक्यते। चतुर्थी वार्ता अपि भिन्ना अस्ति। एकेन वित्तकोष-प्रबन्धकेन स्वस्य उद्योगः त्यक्तः, अधुना च तेन कृषिकार्यार्थं उदग्रयानस्य उपयोगः कृतः। सः कृषिक्षेत्रे नूतनं मार्गं प्रदर्शितवान् अस्ति।




# विश्वपर्यावरणदिवसः

विश्वपर्यावरणदिवसः (World Environment Day) प्रतिवर्षम् जून-मासस्य पञ्चमे दिनाङ्के (५ जून) समग्रविश्वात् महता उत्साहेन आचर्यते। अस्य दिवसस्य मुख्यमुद्देश्यं मानवसमाजे पर्यावरणं प्रति जागरूकतायाः प्रसारः, प्रकृतेः संरक्षणं च अस्ति।

## पर्यावरणस्य महत्त्वम्

अस्माकं परितः यत् किमपि अस्ति—वायुः, जलं, भूमिः, वृक्षाः, पशवः, पक्षाः च—तत् सर्वं मिलित्वा पर्यावरणम् इति कथ्यते। संस्कृतवाङ्मये पर्यावरणस्य महत्त्वं सुस्पष्टं वर्णितम् अस्ति। अस्माकं वेदेषु, पुराणेषु च प्रकृतिः मातृरूपेण पूजिता अस्तिः

### "माता भूमिः पुत्रोऽहं पृथिव्याः।"

भूमिः अस्माकं माता अस्ति, वयं च अस्याः पुत्राः स्मः। यथा एका माता स्वशिशुं रक्षति, तथैव प्रकृतिः अपि अस्मभ्यं जीवनोपयोगीनि वस्तूनि ददाति। शुद्धः वायुः, निर्मलं जलं, फलानि, अन्नानि च प्रकृत्याः एव उपहाराः सन्ति। अतः

पर्यावरणरक्षणम् अस्माकं परमं कर्तव्यम्

## वर्तमानकालस्य समस्याः

अद्यतने वैज्ञानिकयुगे मानवः स्वस्य स्वार्थसिद्धये, भौतिकसुखाय च प्रकृतेः अत्यधिकं दोहनं करोति। औद्योगिकीकरणस्य, नगरीकरणस्य च कारणात् अद्य बहुविधाः समस्याः उत्पन्नाः सन्तिः-**वायुप्रदूषणम्-** यन्त्रागाराणां वाहनानां च धूमेन वायुः विषालुः जातः, येन श्वासरोगाः वर्धन्ते। **जलप्रदूषणम्-** रासायनिकविषाक्ताः पदार्थाः नदीषु प्रक्षिप्यन्ते, येन पेयजलं दूषितं भवति।
**वनानां नाशः-** अट्टालिकानां मार्गणां च निर्माणाय वृक्षाः निरन्तरं कृत्यन्ते। वृक्षाणां अभावात् भूमण्डलीयतापमानं (Global Warming) वर्धते, ऋतुचक्रं च अनियंत्रितं भवति।
यदि एतादृशी स्थितिः एव स्थास्यति, तर्हि पृथिव्याः जीवनमेव नष्टं भविष्यति।

## पर्यावरणदिवसस्य आयोजनम्

अस्याः विभीषिकायाः निवारणाय एव संयुक्तराष्ट्रसंघेन (UN) १९७२ तमे वर्षे विश्वपर्यावरणदिवसस्य आरम्भः कृतः। अस्मिन् दिवसे सम्पूर्णे विश्वे विविधाः कार्यक्रमाः आयोज्यन्तेः

१. वृक्षारोपणम्ः विद्यालयेषु, कार्यालयेषु, समाजेषु च नूतनाः पादपाः रोप्यन्ते।
२. जागरूकता रैल्यः: पर्यावरणसंरक्षणार्थं गोष्ठ्यः, चित्रकलाप्रतियोगिताः, रैल्यः च भवन्ति।
३. संकल्पः: मानवाः प्लास्टिक-वस्तूनां प्रयोगं त्यक्तुं, जलस्य संरक्षणं कर्तुं, प्रकृतेः रक्षणं कर्तुं च प्रतिज्ञां कुर्वन्ति।

## अस्माकं कर्तव्यम्

पर्यावरणस्य रक्षणं केवलं सर्वकारस्य उत कस्यापि एकस्याः संस्थायाः दायित्वं नास्ति, अपितु प्रत्येकं नागरिकस्य कर्तव्यम् अस्ति। अस्माभिः "एकः मनुष्यः, एकः वृक्षः" इति संकल्पः स्वीकरणीयः। यतो हि—
**"वृक्षो रक्षति रक्षितः।"**
**यदि वयं वृक्षाणां रक्षां करिष्यामः, तर्हि वृक्षाः अस्माकं रक्षां करिष्यन्ति। शुद्धे पर्यावरणे एव स्वस्थं जीवनं सम्भवति। अतः आगच्छन्तु, वयं सर्वे मिलित्वा पृथिवीं हरितमयीं, सुन्दरीं, प्रदूषणमुक्तां च कर्तुं दृढसंकल्पं कुर्याम।**
**अयं दिवसः अस्मान् स्मारयति यत् प्रकृतिः विना मानवजीवनं शून्यम् अस्ति।**

# हरितपञ्चायतानाम् आयस्य २५ प्रतिशत् भागः अनाथ-विधवानां कल्याणे भविष्यति व्ययितः- मुख्यमंत्री सुक्खुः



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् 'हरितपञ्चायत' इति अभिनवप्रयासः अधुना राज्यव्यापी अनाथबालकानां विवाहादिप्रसङ्गेषु विधवानां च कल्याणे अपि स्वयोगदानं दास्यति। एतत् क्रान्तिकारी पदं न केवलं नवीकरणीय-ऊर्जा- उत्पादनेन पर्यावरणसंरक्षणं प्रवर्धयिष्यति, अपि तु समाजस्य दुर्बलवर्गेभ्यः अपि सहयोगं प्रदास्यति, येन समावेशी शाश्वतश्च विकासः सुनिश्चितः भविष्यति। अस्य अभियानस्य सामाजिक-कल्याणपक्षम् अधिकं सुदृढं कर्तुं राज्यसर्वकारेण योजनान्तर्गतं राजस्ववितरणप्रतिरूपे (रेवेन्यू मॉडल) संशोधनस्य निर्णयः गृहीतः। अस्मिन् कार्यक्रमे राज्यस्य १०० ग्रामपञ्चायतेषु ५०० किलोवाट-क्षमतायुक्ताः भूमि-आधारिताः सौर-ऊर्जा-परियोजनाः संस्थाप्यमानाः सन्ति। संशोधित-राजस्ववितरण- व्यवस्थानुसारम्, एताभ्यः परियोजनाभ्यः प्राप्तस्य आयस्य २० प्रतिशत् भागः राज्यसर्वकाराय प्रदास्यते, २० प्रतिशत् भागः परियोजनानां सञ्चालनाय अनुरक्षणकार्याय च 'हिम ऊर्जा' संस्थायै आवंटितः भविष्यति, १० प्रतिशत् भागः 'हिमऊर्जा' संस्थां प्राप्स्यति, २५ प्रतिशत् भागः सम्बद्धस्य ग्रामपञ्चायतस्य विकासकार्येभ्यः दीयते तथा च अवशिष्टः २५ प्रतिशत् भागः सामाजिकन्याय- अधिकारिताविभागाय हस्तान्तरितः करिष्यते, येन सम्बद्धग्रामपञ्चायतस्य अनाथेभ्यः विधवाभ्यश्च वित्तीयसाहाय्यं प्रदातुं शक्ष्यते। मुख्यमन्त्रिणा सुक्खु-महोदयेन प्रतिपादितं यत् वर्तमानः राज्यसर्वकारः समाजस्य वञ्चितवर्गाणाम् उत्थानाय अनेकाः योजनाः प्रारब्धवान् अस्ति। एतैः प्रयासैः अनाथबालेभ्यः अन्यबालकैः सह समानाः अवसराः प्राप्ताः, येन ते प्रतिस्पर्धां कृत्व अग्रे वर्धितुं शक्नुवन्ति। तेन कथितं यत् अनाथबालकेभ्यः विधवाभ्यश्च वर्धिता वित्तीयसहायता तेषाम् आर्थिकस्थितिं सुदृढां करिष्यति। उद्योगस्य स्वरोजगारस्य च अधिकान् अवसरान् उपकल्पयिष्यति, येन ते अधिकसुरक्षितं समृद्धं च जीवनं यापयितुं समर्थाः भविष्यन्ति।

## "लौकिकन्यायकोशः" "अग्निशलभन्यायः"

शलभः अर्थात् पतङ्गः अग्निज्वालां दृष्ट्वा तां प्रति उत्पतति तया च ज्वालया दग्धः भवति। तथैव बहवः जनाः उद्विग्नाः भूत्वा तात्कालिकेन आकर्षणेन प्रमादवशात् साधक- बाधकादि-विचारम् अकृत्वा सुखदुःखयो लाभनष्टयोः
च विचारम् अपि अकृत्वा फलं प्रति लोभेन सहसा कार्याणि कर्तुम् इच्छन्ति। तेषां विषये अस्य न्यायस्य प्रयोगः भवति।

डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्

## सर्वकारेण २०२६ कृते २९ तमाः राष्ट्रिय-ई-प्रशासन-पुरस्काराः (National e-Governance Awards) उद्घोषिताः

कार्मिक-लोकशिकायत-पेंशन-मन्त्रालयेन ज्ञापितं यत् ई-प्रशासनस्य क्षेत्रे उत्कृष्टकार्यकर्तृभ्यः आहत्य १७ पुरस्काराः प्रदास्यन्ते। एतेषु १० स्वर्णपुरस्काराः, ६ रजतपुरस्काराः तथा च एकः जूरी-पुरस्कारः (निर्णायकसमिति-पुरस्कारः) सम्मिलिताः सन्ति। मन्त्रालयस्यानुसारम्, एते पुरस्काराः प्रतिवर्षं ई-प्रशासन-परियोजनानां सफलं प्रभावशालि च क्रियान्वयनं प्रोत्साहितुं तथा च उत्कृष्टकार्याणि सम्मानितं कर्तुं दीयन्ते। एतेषां पुरस्काराणां वितरणं राजस्थानस्य जयपुरनगरे आयोज्यमाने २९तमे राष्ट्रिय-ई-प्रशासन-सम्मेलने करिष्यते।

## भारत-जिम्बाब्वे-देशाभ्यां रक्षासहयोगं सुदृढ़ीकर्तुं प्रतिबद्धता पुनरुक्ता

भारत-जिम्बाब्वे-देशाभ्यां रक्षाक्षेत्रे स्वकीयसहयोगं अधिकं सुदृढ़ीकर्तुं प्रतिबद्धता पुनरुक्ता अस्ति। नवदिल्ल्यां आयोजितायां भारत-जिम्बाब्वे-संयुक्तरक्षासमित्याः प्रथमसभ्यायाम्) द्वयोः देशयोः मध्ये सहयोगं वर्धयितुं चर्चा अभवत्।अस्याः सभायाः सह-अध्यक्षता रक्षा मन्त्रालये अन्तर्राष्ट्रियसहयोगस्य संयुक्तसचिवेन अमिताभप्रसादेन तथा च जिम्बाब्वेदेशस्य स्थायिसचिवेन आरोन डेनियल टोंडे नेपेरेरा इत्यनेन कृता।उभाभ्यां देशाभ्यां प्रशिक्षणं, साझा-विमानानां (एयरक्राफ्ट) रक्षणं (प्रबन्धनं) तथा च तकनीकी-सहायता इत्यादिषु वर्तमानसहयोगं वर्धयितुं सहमतिः प्रकटीकृता।एतेन सहैव उभाभ्यां पक्षाभ्यां संयुक्तनिर्माणं, आतंकवाद-विरोधी-सहयोगः, सीमाप्रबन्धनं तथा च शान्तिस्थापना-अभियानानि इत्यादिषु नवक्षेत्रेषु अपि मिलित्वा कार्यं कर्तुं विमर्शः कृतः।